सत्यं शिवं सुन्दरम्

# महाराजासयाजिराववविश्वविद्यालयस्य

## वाचस्पतिः (Ph.D)

## इत्युपाधये स्वीकृतस्य विषयस्य शोधप्रबन्धस्य

## सारांशः (Synopsis)

---

# महर्षिवशिष्ठकृत "धनुर्वेदसंहितायाः"समीक्षात्मकमध्ययनम्

---


**निर्देशकः** | **अनुसन्धाता**

**डॉ. रामपाल शुक्लः**
**विभागाध्यक्षः**
पारम्परिक संस्कृताध्ययनम्
बरोडासंस्कृतमहाविद्यालयः
महाराजासयाजिराववविश्वविद्यालयः,
वडोदरा

**जयसिंह डी. गोहेल**
ग्राम – भेटासीवांटा
ता. आंकलाव,
जिला– आणंद,


## शोधकेन्द्रम्

बरोडासंस्कृतमहाविद्यालयः
महाराजासयाजिराववविश्वविद्यालयः,
वडोदरा

**पञ्जीकरण संख्या** **BSM / 102 /**

**वर्षम् :** 2019

# महर्षिवशिष्ठकृत 'धनुर्वेदसंहितायाः'' समीक्षात्मकमध्ययनम्

## प्रस्तावना

गौतमवशिष्ठविश्वामित्रवामदेवमहर्षिभिः स्वबलात् आदिकालात् विद्यमान– वेदानां साक्षात्कारः कृतः न तु प्रणयनम्। अतः ऋषयः मन्त्रद्रष्टारः इति 'ऋषि' शब्दस्य लक्षणं जातम्। अत एव वेदः भारतीयमनीषायाः सर्वस्वमेवास्ति स्वतःप्रमाणम् एवमपौरुषेयश्चेति ।

संस्कृतवौंमये अनेकानि शास्त्राणि सन्ति। शास्त्रनिर्माणाय एका विशिष्टपद्धतिः आसीत्। यस्य निर्देशः प्राचीनग्रन्थेषु उपलभ्यते। पद्धतिः तेषाम् उपकरणानां नामः तन्त्रयुक्तिः इति संप्राप्यते। अस्य शब्दस्य शब्दार्थः शास्त्रयोजना आचार्यकौटिल्येन अर्थशास्त्रस्य पञ्चदशे अधिकरणे तन्त्रयुक्तीनां विवेचनं कृतं, विष्णुधर्मोत्तरपुराणेऽपि तेषां संख्या द्वात्रिंशत्(32) अस्ति । चरकसंहितायां षट्त्रिंशत् (36) तंत्रयुक्तीनां विवेचनमुपलभ्यते ।

अयं ग्रन्थः अतीवप्राचीनः इति सर्वप्रथमं वशिष्ठधनुसंहिता बैंलिपिमुद्रणतः पं. ईश्वरचन्द्रशास्त्रीद्वारा सम्पादिता (1922) अस्य ग्रन्थस्य पूर्ववृत्तं इदमस्ति यत् पी.सी. चक्रवर्ती सदृशं शताब्द्यां प्रकाशिता तदेवसमयः शिवाजी महाराजस्य (AD 1630 to 1880 ) अस्य ग्रन्थस्य संस्कृत –संस्करणं पश्चात् जातम्। अस्मिन् ग्रन्थे धनुर्वेदस्य विवेचनं वर्तते ।

सम्प्रति अयं विश्ववैज्ञानिकयुगे जीवति। तथापि नूतनानि उपकरणानि साधनानि निर्मितानि । यथा युद्धविषयकमुपकरणानि सन्ति एतेषां उपकरणानां प्रादुर्भावः निर्माणं च केन कारणेन कथं कारणेन क्रियते इत्यस्य विवेचनं अस्मिन् ग्रन्थे वर्तते। अत्र प्राचीनकालस्य युद्धे धनुः प्रयोगः भवति स्म । किन्तु कतिप्रकारकः धनुरस्ति भवन्ति इत्येषां विवेचनम् ग्रन्थेऽस्मिन् सम्यग्रूपेण प्रतिपादितम् । अस्य ग्रन्थस्य हिन्दी–अनुवादः

सम्प्रति न उपलभ्यते। अस्मिन् विषये यदि सम्यग् अनुसंधानं भवेत् तदा साम्प्रतिके युगे सर्वेषां जनानां अस्त्रशस्त्रादीनां ज्ञानं प्राप्यस्यते । अपि च पूर्वकाले अस्त्रशस्त्रादीनां किं वैशिष्ट्यं ? का उपयोगिता च ? इत्यादयः अपि विशिष्टज्ञानं भव्त्येव।

महर्षिवशिष्ठकृतधनुर्वेदसंहितायाः जे.पी. पब्लिसिंगहाउस इति ग्रनथस्य प्रकाशिता अयमेव आधारः मया स्वीकृतः । अस्मिन् ग्रन्थे 265 श्लोकाः सन्ति । प्राचीनपरम्पराधारेण श्लोकरचना अत्र विद्यते । अस्य ग्रन्थस्य आँलभाषायां व्याख्या श्रीपूर्णिमाराय इत्यनया कृता वर्तते इति ।

चतुर्वेदानां चत्वारः उपवेदाः सन्ति । यथा –

| | |
|---|---|
| ऋग्वेदस्य | = आयुर्वेदः |
| यजुर्वेदस्य | = धनुर्वेदः |
| सामवेदस्य | = गान्धर्ववेदः |
| अथर्ववेदस्य | = अर्थवेदः (स्थापत्यवेद) |

यजुर्वेदस्य धनुर्वेदोपवेदस्वरूपे युद्धनीतेः प्राचीनयुद्धशास्त्रस्य आधारभूत –ज्ञानराशिः अस्ति ।

संस्कृतज्ञानधारायाः बहवः ग्रन्थाः कालग्रस्ताः जाताः । तैः सह उपवेदापि लुप्ताः जाताः । तथापि तेभ्यो निष्पन्नमन्यसाहित्यं प्राप्नोति तेषु **महर्षिवशिष्ठकृत 'धनुर्वेदसंहिता' विचक्षणग्रन्थः** अस्ति । तत्र प्राचीनकालस्य युद्धनीतिः, युद्धस्यायुधानि अस्त्रशस्त्रानां प्रयोगः, युद्धनियमादयः प्राप्नोति । तस्य ग्रन्थस्य संक्षिप्तविवरणनम् एवमस्ति। यथा ––

''धनुर्वेदः'' शब्देपदद्वयम अस्ति। धनुः वेदश्च। धनुः = धिञ+उस् = धनुष्य इत्यर्थः । 'वेदः' इत्युक्ते ज्ञानम् अतः 'धनुर्वेदः' इत्युक्ते धनुष्यस्य (धनोः) ज्ञानम् ।

किन्तु अत्र धनुः शब्दस्य अर्थ मात्र चापैव न भवति – अत्र धनुः शब्दस्य विशालार्थः जातः। 'धनुः' शब्दात् सम्पूर्णयुद्धशास्त्रस्य (दीक्षा, संग्रहः, सिद्धप्रयोगाः प्रयोगविधयः) बोधं भवति इति।

धनुर्वेदविषये भगवतः शिवात् आरभ्य (प्राचीनकालात्) अद्यपर्यन्तं ख्रिस्ताब्द 14000 शतक पर्यन्तम्) ग्रन्थप्रणयनं भवति स्म इति। धनुर्वेदविषयस्य आचार्यपरम्परायां भगवान् सदाशिवः भार्गवपरशुरामः महर्षिवशिष्ठः राजर्षिविश्वमित्रः इत्यादयः प्रचलति ।

तत्र महर्षिवशिष्ठः तत्परम्परायाः महत्वपूर्णं सोपानमस्ति। महर्षिवशिष्ठेन तस्यां परम्परायां 'धनुर्वेदसंहिता' नामकः ग्रन्थः प्रणीतः ।

मया **महर्षिवशिष्ठकृत–'धनुर्वेदसंहितायाः' समीक्षात्मकमध्ययनम्** इति शोधविषयं स्वीकृत्य शोधकार्यं कृतमिति । शोधप्रबन्धस्यसारांशः अत्र प्रस्तूयते। अयं विषयः चतुर्षु अध्यायेषु विभक्तोऽस्ति ।

प्रथमे हि मया विषयस्य प्रस्तावना लिखितः ततः परं –

**प्रथमेऽध्याये** महर्षिवशिष्ठस्य संस्कृतवांगमये महत्त्वं वैशिष्ट्यञ्च लिखितम्। अत्र ऋग्वेदादारभ्य वशिष्ठरामायणपर्यन्तं तन्निर्मितग्रन्थानां विस्तरेण विवेचनं कृतम्।

**द्वितीयेऽध्याये** उपवेदानां विवेचनमस्ति ।तत्रापि विशेषरूपेण धनुर्वेदस्य वैशिष्ट्यं, विषयविवेचनं, धनुर्वेदे के–के विषयाः ग्रन्थकारेण निर्दिष्टाः तेषां समेषां विवरणम् उपस्थापितम् ।

**तृतीयेऽध्याये** अहमत्र धनुर्वेदसंहितायाः सौंपौं परिचयं अलिखम्। अत्रैव महर्षिवशिष्ठविरचितस्य ग्रन्थस्य सारांशरूपेण अत्र परिचयः उपस्थाप्यते, धनुर्वेदसंहितायां 265 श्लोकाः सन्ति ।अनेन सह गद्यखण्डानि च ग्रन्थकारेण लिखितानि। तन्मध्ये धनुर्वेदविषयस्य विशद् विवेचनमत्र अतीवरुचिकरशैल्यां लिखितम्। तत्रापि युद्धस्य समस्तविधामपि रहस्यमत्र उद्घाटितम् । शास्त्रविधामपि वर्णितम् ।

अस्मिन्नेव अध्याये धनुर्वेदसंहितायां वर्णिताशस्त्राणां परिचयः उपयोगिता च विद्यते। तथा च शस्त्राणां लक्षणानि उदाहरणानि चिन्हानि च निर्दिष्टाानि।

सम्प्रति काले कानि–कानि शस्त्राणि–अस्त्राणि प्रसिद्धाानि सन्ति तेषाम् ममात्र उल्लेखः कृतः। धनुर्वेदसंहितायां प्रतिपादित अस्त्रशस्त्रलक्षणानां मया अत्र समीक्षा कृता।

**चतुर्थेऽध्याये** सारांशरूपेण धनुर्वेदसंहितायां ग्रन्थकारेण यदुक्तं तत्समीक्षणमत्र लिखितमस्ति ।

**पर्यन्ते च मयोपसंहारः** लिखितः । अत्र धनुर्वेदसंहितायाः समीक्षात्मकमध्ययनम् इत्यस्य उपयोगिता तद्रहस्यं सम्प्रति अस्य किं स्वरूपम् इत्यादिकं सर्वमत्र लिखितमस्ति।

परिशिष्टे धनुर्वेदसंहितायां प्रयुक्तपारिभाषिकशब्दानाम् अर्थः तत्प्रयोगाश्च संग्रथितः ।

सन्दर्भग्रन्थरूपेण मया अत्र वेदादरभ्य धनुर्वेदस्य सन्दर्भितग्रन्थानां संस्कृतसाहित्यस्य च आधारः, ग्रन्थानां च नामावली संश्लिष्टा । तथा शोधविषयस्य अनुक्रमणिकापि अत्र प्रस्तुताऽस्ति ।

# महर्षिवशिष्ठकृत "धनुवेर्दसंहितायाः" समीक्षात्मकमध्ययनम्

## अनुक्रमणिका

**प्रस्तावना**

**प्रथमोऽध्यायः**

1. महर्षिवशिष्ठस्य संस्कृतवाङ्मये महत्वं वैशिष्ट्यमञ्च
2. महर्षिवशिष्ठस्य ग्रन्थानां विवेचनम्

**द्वितीयोऽध्यायः**

1. उपवेदानां महत्त्वम्
2. धनुर्वेदसंहितायाः परिचयः
3. धनुर्वेदस्य विषयानवैशिष्ट्यम्

**तृतीयोऽध्यायः**

1. धनुर्वेदसंहितायां वर्णितशस्त्राणां परिचयः उपयोगिता च
2. धनुर्वेदसंहितायां प्रतिपादितलक्षणानां समीक्षा

**चतुर्थोऽध्यायः**

1. धनुर्वेदसंहितायाः समीक्षणम्

**उपसंहारः**

**परिशिष्टम्**

1. धनुर्वेदसंहितायां प्रयुक्तपारिभाषिकशब्दानां अर्थप्रयोगः
2. सन्दर्भग्रन्थनामावली